॥ श्रीसारव्यतत्वकौमुदिपंचऋषिभाष्यः ॥

श्रीगणेशायनमः॥ ॥ श्रीपरमात्मनेकपिलायनमस्तस्मैघनाविद्योदधोजगतिमग्ने कारुण्यात्सांख्यमयीनौरिवविहिताप्रणाशा ॥ १ ॥ अस्यग्रंथस्यार्थप्रमाणसिध्यंतहेतुभिर्युक्तं॥ भाष्यांश्रीष्यहितार्थसमासतोहंभवक्ष्यामि॥ २ दुःखत्रयाभिघातात्जिज्ञासातदभिघातकेहेतौ॥ दृष्टेसापार्थाचेन्नैकांतात्यंततोभावात्॥ ३॥ अस्याआर्याआर्थाउपायतःक्रियतेत्रितांप्रक्ष्यतिसिध्यर्थामुपोद्घा — उच्यतेइहहिभगवान्ब्रह्मस्कंदःकपिलोनामभगवानृषि — र्यसंपन्नः तथाचोक्तं॥ एश्वर्यस्यसमग्रस्यवीर्यस्ययशसःश्रियज्ञानवैराग्यमोक्षस्यषण्णांभगइतिस्मृतः॥ उसीत्प्रलयंचैवकृतानायगतिं॥ वेत्तिविद्यामविद्यांचसवाच्योभगवानिति॥ सनकश्चसनंदश्चत्रतीयश्चसनातनः॥ आसुरिःकपिलश्चैववोढुःपंचशिखस्तथा॥ इत्येतेब्रह्मणःपुत्राःसप्तप्रोक्तामहर्षयः॥ इतितत्रकपिलस्यचत्वारोभावाःसहोसंज्ञाः॥ धर्मोज्ञानंवैराग्यमैश्वर्यंचेतिसहेवमुत्पन्नःसर्वअंधेतमसिमज्जुजुगदालोक्यसंसारपारयेणसंजातकारुण्याज्जिज्ञासमानायसगोत्रायआसुरयेब्राह्मणविदंपंचविंशतितत्वज्ञानमुक्त्वानयस्यज्ञानात्संसरक्षायोभवति॥ एतस्मिन्नर्थेऽधसंसारमाह॥ पंचविंशतितत्वज्ञोयत्रतत्राश्रयेरतः॥ जटीमुंडीशिखीवापिमुच्यतेनात्रसंशयः॥ तदिदमाह॥ दुःखत्रयाभिघातात्जिज्ञासारति॥ तच्चदुखत्रयंआध्यात्मिकमाधिभौतिकमाधिदैविकंचेति॥ तत्रआध्यात्मिकंद्विविधंशारीरंमानसंचेतिशारीरंवातपित्तश्लेष्मविपर्ययकृतंज्वरातीसारादि॥ मानसंकाप्रियस्यासंगोर्गप्रियस्यप्रसंगइत्यादि॥ अथाधिभौतिकंचतुर्विधभूतग्रामनिमित्तं॥ मनुष्यपशुमृगसरीसृपदंशमशकयूकामत्कुणरक्षोगवरेभ्यःस्वेदजजरायुजांडजोद्भिज्जेभ्यःसकाशादुत्पद्यते॥ तदधिभौतिंब्रह्माधिदैविकंच॥ देवानामिदंदैवंदिवःप्रभवतिवादोयं॥ तदधिकृत्यदुपजायतेतदाधिदैविकं॥ गंधर्व ॥ २ ॥

ग्रहगणाःकिनीशाकिन्युपद्रवादि॥ शीतोवातवर्षाग्न्यनिपातजं॥ एवंयथादुःखत्रयाभिघातात्जिज्ञासाकार्याकृतदभिघातकेहेतौ॥ तस्यदुःखत्रयस्याभिघातकोयोहेतुःतत्रेदृष्टेसापार्थाचेत्॥ दृष्टेहेतौदुःखत्रयाभिघातकेसतिसाजिज्ञासाआपार्थाव्यर्थाचेत्यादि॥ तत्राध्यात्मिकस्यद्विविधस्यापिवैद्यकशास्त्रप्रयोगोक्तक्रियया प्रियस्यागमअप्रियस्यहानिश्चाध्यात्मिकोपायःएवमाधिभौतिकस्यरक्षादिनाआधिदैविकस्यापिमणिमंत्रप्रवातप्रावरणावरणादिनाभिघातोदृष्टःदृष्टेसापार्थाचेदेवंमन्यस्येयादिदिन्॥ तैकांतात्यततोभावात्॥ यतएकांतोऽवश्यंअत्यंततोनिदृष्टेनहेतुनाअभिघातोनभवति॥ दुःखस्यतस्मादन्यत्रैकांतात्यंताभिघातकेहेतौजिज्ञासाकार्येति॥ ब्रह्मजिज्ञासाकरणीया प्रथमार्थव्याख्य॥ ॥ दृष्टवदानुश्रविकस्ह्यविशुद्धिक्षयातिशययुक्तःतद्विपरीतःश्रेयान्व्यक्ताव्यक्तज्ञविज्ञानात्॥ यदिदृष्टादन्यत्रजिज्ञासाकार्यातोपिनैवंयतआनुश्रविकोहेतुःदुःखत्रयाभिघातकः॥ अनुभूयतेइत्यनुश्राविकः॥ वैदिकप्रयोगः॥ अनुश्रवात्आगमात्सिद्धेः॥ तद्यथा॥ अपासोममम्रताअभूमागन्मज्योतिरविदामदेवान्किंनूनमस्मात्कृणवदरातिः॥ किमधूर्तिरमृतमर्त्यस्य अस्यार्थः॥ कदाचिदिंद्रादीनांदेवानांजत्यआसीत्॥ कथंवयंअमृताअमरणशीलाअभूमतविचारवंकुसः यस्माद्वयंसोमंअपामसोमंपीतवंतः॥ तस्मादमृताअभूम॥ अमराभूतवंतइत्यर्थः॥ किंच॥ अगन्मज्योतिःगतवतोज्योतिःस्वर्गमित्यर्थः॥ अविदामदेवान्देवान्दिव्यन्विदितवंतःएवंच — नूनमस्मान्कृणवदरातिःनूनंनिश्चितंकिमरातिःअस्मान्कृणवत्किंकर्तेतिकिमूधूर्तिरमृतमर्त्यस्यास्यधूर्तिर्नरासाच्किमुकरिष्यतिअमृतमर्तस्यअमरणशीलस्य॥ अन्यद्ब्रवेदेतावंतिर्कफलंश्रूयते॥ पश्वधेनसर्वान्लोकान्

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

जयति॥ मृत्युंतरति॥ ब्रह्महत्यांतरतियोऽश्वमेधेनयजेतइति॥ यप्याएकांतिकात्यंताभावात्॥ एवंवेदोक्तेपिसाषार्थाएव॥
साजिज्ञासातत्रोच्यते दृष्टवदानुश्रविकः दृष्टेनतुल्योदृष्टवत्॥ क॥ असोआनुश्रविकः॥ कस्मात्सः हिनिश्चितंसअ
र्थंयस्मात्कारणादयंअविशुद्धिक्षयातिशययुक्तःअविशुद्धियुक्तः॥ पशुघातत्वात्॥ जैनाचार्याकमतं॥ कणानुद्
ग्धातरुन्छित्वाक्त्वारुधिरकर्दमं॥ स्वर्गंतुगम्यतेतेननरकेकेनगम्यते॥ अप्यश्रुतिः॥ षट्शतानिनियुज्यंतेपशू
नांमध्यमेहनि॥ अश्वमेधस्यवचनादूनानिपशुभिस्त्रिभिः॥ यद्यपिश्रुतिस्मृतिविहितोधर्मः॥ इतियथास्वर्गकामो
यजेत॥ अग्नीसोमीयंपशुंआलभेत॥ तथापिमिश्रीभावादविशुद्धियुक्त इतिबहुनिंद्रसहस्राणिदेवेयानांयुगे
युगे कालेनसयतीतानिकालोहिदुरतिक्रमः॥ २॥ सकलमपिकालेनातिक्रांतंकालस्यकेनापिनातिक्रांतः॥ए
कब्रह्मणोदिवसस्यांतरेचतुर्दशेंद्राःपतंतीतिकृत्वा॥ एवमिंद्रादिपातात्क्षयमुक्तः॥ किंचातिशययुक्तः॥ अति
शयोविशेषस्तेनयुक्तः॥ विशेषगुणादर्शनात्॥ इतरस्यदुःखंभवतीति॥ एवमानुश्रविकापिहेतु॥ दृष्टवत॥ कोहेतु
स्तर्हिश्रेयात्इत्युच्यतां॥ तद्विपरीतश्रेयानतोभ्यांदृष्टानुश्राविकाभ्यांविपरीतस्तद्विपरीतः॥ श्रेयानप्रत्यस्यते॥
अविशुद्धिक्षयातिशयैरयुक्तत्वात्॥ सकथमित्याह॥ व्यक्ताव्यक्तज्ञविज्ञानात्॥ तत्रव्यक्तंमहदाख्यंबुद्धिः॥ अहं
कारःपंचतन्मात्राण्येकादशेंद्रियाणि॥ पंचमहाभूतानि॥ अव्यक्तंप्रधानंज्ञःपुरुषःएवमेतानिपंचविंशतितत्वा
न्यव्यक्तज्ञानिर्संज्ञाभिरुच्यते॥ एतद्विज्ञानात्॥ श्रेयानइत्युक्तंकालः॥ पंचविंशतितत्वज्ञोयत्रतत्राश्रमेरतः॥ जटी
मुंडीशिखीवापिमुच्यते॥ इतिपंचनात्॥ अथव्यक्ताव्यक्तज्ञानांकोविशेषतत्युच्यते॥ २॥ मूलप्रकृतिरवि
कृतिर्महदाद्याःप्रकृतिविकृतयः॥ सप्तषोडशकश्चविकारोनप्रकृतिनविकृतिःपुरुषः॥ मूलप्रकृतिप्रधानंप्रकृ

॥ २॥

तिविकृतिसप्तकस्यमूलभूतत्वात्॥ मूलंचसाप्रकृतिश्चमूलप्रकृतिः॥ अविकृतिरन्यस्मान्नोपपद्यते॥ नविकृतिः॥
कस्यचित्॥ विकारोनभवतितिमहदाद्याप्रकृतिप्रकृतयःसप्तामहानितिबुद्धिः॥ सपू॥ बुद्धिरहंकारःपंचतन्मात्रा
णिएतानिसपू॥ प्रकृतिप्रकृतयः॥ प्रध्यानाद्बुद्धिरुत्पद्यते॥ तेनविकृतिः॥ प्रध्यानस्यविकरइति॥ सैवाहंकारमुक्ता
दत्यतःप्रकृतिः॥ अहंकारोपिबुद्धिरुत्पद्यतइतिविकृतिः॥ अहंकारःपंचतन्मात्राणिउत्पादयतीतिप्रकृतिः॥ तत्र
शब्दतन्मात्रमहंकारादुत्पद्यतइतिविकृतिः॥ तच्छब्दाकाशमुत्पादयतीतिशब्दतन्मात्रप्रकृतिः॥ एवंरूपतन्मात्रमहंका
रादुत्पद्यतइतिविकृतिः॥ तद्रूपंतेजउत्पादयतीतिप्रकृतिः॥ रसतन्मात्रमहंकारादुत्पद्यतेइतिविकृतिः॥ तद्रसंआप
उत्पादयतीतिप्रकृतिः॥ गंधतन्मात्रमहंकारादुत्पद्यतइतिविकृतिः॥ तद्गंधंपृथिवीमुत्पादयतीतिप्रकृतिः॥ एवंम
हदाद्याःप्रकृतितिविकृतयः॥ सप्तप्रकृतयश्चविकृतयश्चतारइति॥ षोडशकश्चविकारः॥ पंचकर्मेंद्रियाणिपंचक
र्मेंद्रियाणिएकादशंमनः पंचमहाभूतानि एषषोडशकोगणोविकिरेवविकारोविकृतिः॥ नप्रकृतिर्नविकृ
तिःपुरुषः॥ एवंएषांव्यक्ताव्यक्तज्ञानांत्रयाणांपदार्थानांत्रैः कियद्भिःप्रमाणैःकेनकस्यप्रमाणेनसिद्धिर्भव
ति॥ इहलोकेप्रमेयंप्रवक्तृप्रमाणेनसाध्यते॥ यथाप्रस्तुताभिव्रीह्यादयः॥ तुलायाचरन्नादृ॥ तस्मात्प्रमाणम
भिधेयं॥ इदृष्टमनुमानमूपवचनंचसर्वप्रमाणसिद्धत्वात्त्रिविधंप्रमाणमिष्टंप्रमेयसिद्धिःप्रमाणाद्धि॥ दृष्टं
यथाश्रोत्रंश्लोकचक्षुर्घ्राणंजिह्वानासाइति॥ पंचबुद्धींद्रियाणिशब्दस्पर्शरूपरसगंधाःपंचानांपंचविषयायथा
संख्यंश्रोत्रंशब्दंगृह्णाति॥ त्वक्स्पर्शंचक्षुःरूपंजिह्वारसंघ्राणंगंधमितिएतत्दृष्टमित्युच्यतेप्रमाणंप्र
त्यक्षेणयोर्थोनगृह्यतेसोनुमातव्यग्राह्यः॥ यथाधूमेनाग्निःसाध्यतेएतदनुमानंप्रमाणंप्रत्यक्षेणानुमानेनवा

योर्थोनमश्यतसआपूर्ववचनात्। सआपूर्ववचनात्प्राह्यः॥ यथाइंद्रोदेवराजउत्तराःकुरवः॥ स्वर्गेधसरसधइत्यादि॥ प्रत्यक्षानुमानवाह्यमपि॥ आपूर्ववचनात्प्रत्येयते॥ अपिचोक्तं॥ आगमोह्याप्तवचनमाप्तदोषक्षयाद्विदुः॥ क्षीणदोषोनलंवाक्यंब्रूयाद्दुःखसंभावात्॥ अनृतस्यहेतुर्तास्तीति॥ स्वकर्मण्यभियुक्तोयः संगद्वेषंविवर्जितः॥ पूजितस्तद्विधैर्नित्यमाप्तज्ञेयः सतादृशः॥ एतेषुप्रमाणेषुसर्वप्रमाणानिसिध्यंतिअथकानितानिअन्यप्रमाणान्युच्यंते॥ अर्थापत्तिः॥ संभवः॥ अभावः॥२॥ प्रतिभार्थैतिह्यमित्युपमाचेति॥ षट्प्रमाणानि॥ तत्रार्थापत्तिर्द्विविधा॥ दृष्टश्रुताच॥ तत्रदृष्टयथा॥ एकस्मिन्पक्षेआत्मभावंगृहीत्वा तरास्मिन्नपिआत्मभावोगृह्यते॥ जीवन्देवदत्तोगृहेनास्ति॥ श्रुतायथा॥ दिवादिवदत्तोनभुंक्ते॥ अन्यथापीवरोदृश्यते॥ ततोवगम्यतेरात्रौभुंक्तेसंभवोयथा॥ प्रच्छादयत्युकेचत्तारः॥ कुरवःसंभाव्यतेएवंसभवःसंपन्नः॥ अभावोनामप्रागितरेतरात्यंतसर्वाभावलक्षणश्चतुर्विधः॥ प्रागभावोयथा॥ देवदत्तः॥ कौमारयौवनादिषुवर्ततेइतरेतराभावः॥ घटेपटाभावः॥ घटेपटाभावइति॥ अत्यंताभावः॥ खरविषाणंवंध्यासुतखपुष्पवत्॥ इतिसर्वाभावोदग्धपटवदितितप्ताश्रुष्कध्यानदर्शनात्॥ दृष्टेरभावोवगम्यते॥ एवमभावोअनेकधाप्रतिभायथादक्षिणेयत्रवचविंध्यस्यसह्यस्यचयदुत्तरं॥ पृथिव्यामासमुद्रांसप्रदेशोयमनोरमः॥ एवमुक्तेतस्मिन्प्रदेशेशोभनागुणाः॥ संतीतिप्रतिभोत्पद्यते॥ प्रतिभामानसंज्ञानामितिऐतिह्यं॥ यथाइतिह्यवीतिपृथांलोकोयथात्रवरेयक्षणाप्रतिवसतीतिएवमैतिह्यं॥ उपमानामयथागोपिवगवयः॥ समुद्रंइवतडागएवमेतानिषट्प्रमाणानित्रिषुदृष्टादिष्वंतर्भूतानि॥ तत्रानुमानेतावदर्थापत्तिरंतर्भूता॥ संभवाभावमतिभौतिह्योपमा॥ श्रोत्रवचने॥ तस्मात्सर्वप्रमाणासिध्यत्वात्॥ त्रिविधंप्रमाणमिष्टं॥ तदाश्रुतेनत्रि

॥३॥

विधेनप्रमाणेनप्रमेयसिद्धिर्भवतीतिशेषः॥ प्रमेयसिद्धिःप्रामाण्यधीप्रमेयंप्रधानंबुद्धिरहंकारःपंचतन्मात्राण्येकादशेंद्रियाणिपंचमहाभूतानिपुरुषइति॥ एतानिपंचविंशतितत्वानि॥ व्यक्ताव्यक्तज्ञसंज्ञाभिरुच्यंते॥ तत्रकिंचित्प्रत्यक्षेणसाध्यं किंचिदनुमानेनकिंचिदागमेनेतित्रिविधंप्रमाणमुक्तं॥ तस्यकिंलक्षणमित्येतदाह॥४॥ प्रतिविषयाध्यवसायोदृष्टंत्रिविधमनुमानमाख्यातं॥ तल्लिंगलिंगिपूर्वकमाप्तश्रुतिरापूर्ववचनंच॥ प्रतिविषयाध्यवसायः॥ श्रोत्रादीनांशब्दादिविषयेध्यवसायोदृष्टंप्रत्यक्षमित्यर्थः॥ त्रिविधमनुमानमाख्यातं॥ पूर्ववच्छेषवत्सामान्यतोदृष्टमिति॥ पूर्वमस्यास्तीतिपूर्ववत्॥ यथामेघोन्नत्यावृष्टिंसाधयति॥ पूर्ववत्॥ दृष्टत्वात्॥ शेषवद्यथा॥ समुद्रादेकंजलमुपलंभणमास्वाद्य॥ शेषस्यास्यास्तिलवणभावइति॥ सामान्यतोदृष्टं॥ देशाद्देशांतरप्राप्तेर्गतिमच्चंद्रतारकंचैववत्॥ यथाचैत्रस्यानंदेशाद्देशांतरप्राप्तमवलोक्यगतिमातथमितितद्वच्चंद्रतारकमपि॥ तथापुष्पितांआम्रादर्शनात्॥ अन्यत्रापि॥ पुष्पिताआम्राइतिसामान्यतोदृष्टेनसाधयति॥ एतत्सामान्यतोदृष्टंकिंच॥ तल्लिंगलिंगपूर्वकमितितदनुमानंलिंगपूर्वकंयत्रलिंगेनलिंग्यनुमीयतेयथात्रिदंडेनयतिः॥ लिंगिपूर्वकंच॥ यत्रलिंगिनलिंगमनुमीयते॥ तथादृष्टानमस्यैत्रिदंडमिति॥ आप्तश्रुतिराप्तवचनंच॥ आप्ताआचार्याब्रह्मादयः॥ श्रुतिर्वेदः॥ आप्तश्चश्रुतिश्चआप्तश्रुतिः॥ तेषांवचनं॥ तथापूर्ववचनमिति॥ एवंत्रिविधप्रमाणमुक्तं॥ तत्केनप्रमाणेनकिंसाध्यमित्युच्यते॥ ५॥ सामान्यसिद्धिरनुमानात्॥ तस्मादपिचासिद्धंपरोक्षमाप्तागमासिद्धं॥ सामान्यतोदृष्टानींद्रियाणांइंद्रियाण्यतीत्यवर्तमानानांसिद्धिः॥ प्रधानपुरुषावतींद्रियौसामान्यतोदृष्टेनानुमानेनसाध्येते॥ यस्मान्महदादिलिंगंत्रिगुणंयस्यदंत्रिगुणंकार्यंतत्प्रधानमितियतश्चाचेतनमितोन्योधिष्ठातापुरुषइतिव्यक्तंप्रत्यक्षसाध्यंत

स्मादपिचासिद्धं॥ अत्रकश्चिदाह॥ अध्यनपुरुषोनोपलभ्यते॥ यच्चनोपलभ्यतेलोकेतस्मिन्नास्ति॥ तस्मात्नावपिनस्तः॥
यथाद्वितीयमनीश्वरंशिरस्तियोवादुरितितदुच्यते॥ अत्रसतामप्यर्थानामष्टस्योपलब्धिर्नभवति तद्यथा ५
अतिदूरात्सामीप्यादिंद्रियघातान्मनोनवस्थानात् व्यवध्यनादभिभवात्समानाभिहाराच्च॥ हूसतामर्थानाम
तिदूरादनुपलब्धिर्दृष्टा यथादेशांतरस्थानांचैत्रयेत्रविष्णुमित्राणां॥ सामीप्याद्यथाचक्षुषाजनानुपलब्धिः इं
द्रियाघातादाथाबधिर्यथा॥ ग्रबुरूपानुपलब्धिः॥ मनोनवस्थानाद्यथाअन्यचित्तः॥ सम्यक्कुक्ष्यमानमपि
नावधार्यते॥ सौक्ष्म्याद्यथा॥ धूमैकमत्रुटिनीहारपरमाणवोगगनगतानोपलभ्यंतेवावधानाद्यथा॥ कुड्येनव्यवहि
तंवस्तुनोपलभ्यते॥ घटपटादि॥ अभिभवाद्यथासूर्यतेजसाभिभूताग्रहनक्षत्रतारकानोपलभ्यतसमानाभि
हाराद्यथाः मुक्तौमुहः क्षिप्तः॥ कुवलयामलकमध्येकुवलयामलकेक्षिप्तेकपोतमध्येकपोतोनोपलभ्यते॥ सामा
न्यद्रव्यमध्याद्भूतशैलादृष्टःपदृष्टेसंध्यमुपलब्धिः॥ सतामर्थानामिहदृष्टा॥ एवंचासत्कथंमन्युपगम्यतेप्रध्यनपु
रुषयोश्चानुपलब्धिः॥ केनहेतुनाकेनचोपलब्धिस्तदुच्यते॥ सौक्ष्म्यात्तदनुपलब्धिः नीचावाकायतस्तदुपलब्धिः॥
मरुदाहितच्चकार्यप्रकृतिविरूपंसरूपंच॥ सौक्ष्म्यातदुपलब्धिःप्रध्यस्येत्यर्थः॥ अस्तिप्रधानंसौक्ष्म्यान्नोपल
भ्यते॥ नाभावात्तद्यथा॥ आकाशेधूमोभ्रबुटिनीहारपरमाणवःसंतोपिनोपलभ्यते॥ कथंतर्हि नेदुपलब्धिका
र्यतस्तदुपलब्धिः॥ कार्यंअदृष्टाः कारणसाधनंक्रियते॥ अस्तिप्रधानंकारणंयस्येदंकार्यंकिंतेमहदादितच्च
कार्यंमहान्बुद्धिरादेयस्यकार्यस्यतन्महदादिकार्यं॥ बुद्धिरहंकारः॥ तन्मात्राण्येकादशेंद्रियाणिपंचमहाभूता ॥ ४ ॥
निएतत्कार्यंकार्यस्तदुपलब्धिः॥ कार्यंत्रिगुणं॥ प्रधानमपित्रिगुणंमन्यते॥ कारणानुगुणत्वात्कार्यस्येति॥ तस्मा

दस्तिप्राधानंयस्यमहदादिकार्यंतच्चकार्यंप्रकृतिविरूपंसरूपंचप्रकृतिः॥ प्रधानं॥ प्रकृतेरसदृशं॥ प्रकृतेः समानरूपं
च॥ यथालोकेउत्पएवपुत्रोभवति॥ अनुत्पश्चभवति॥ यदिरूपेणतुल्योनतगुणेरथगुणोरूपेणेवंव्यक्तंप्रधा
नस्यतुल्यमतुल्यंच येनहेतुनातुल्यमतुल्यंचतद्विशेषात्वक्ष्यामः॥ यदिदंमहदादिकार्यंतत्किं प्रधानसतअथासत
आचार्यविप्रतिपत्तेरयंसंशयः॥ तत्रैसांख्यादर्शनेसत्कार्यंबौद्धादीनांअसत्सन्नापिनभवति॥ अथासत्नसंभवती
तिअतस्तत्कार्यविप्रतिषेधरूपत्वमाह॥ असदकरणादुपादानग्रहणात्सर्वसंभवाभावात्॥ शक्तस्यशक्यकरणा
च्चुरणाभावाच्चसत्कार्यं॥ असदकरणात्नसतअसत्असतोअकरणंअसदकरणंतस्मादसदकरणात्सत्कार्यं
इहलोकेअसतः॥ करणंनास्ति॥ यथानसिकतेभ्यस्तोलोत्पत्तिः॥ तस्मात्सर्वः कारणादस्तिप्रागुत्पत्तेः प्रधानोदृश्य
त्वंअतः॥ सकारणोत्पत्तिः तस्मात्सर्वः कारणादस्तिप्रागुत्पत्तेः) यंयंकंचान्यत॥ उपादानग्रहणात्उपादानंकारणंत
स्माग्रहणात्रहयोयेनाथासतउपादानग्रहणंकरोति॥ यथादधिक्षीरस्यनजलस्य तस्मात्सत्कार्यंतअससंभा
वाभावात्॥ सर्वस्यसर्वसंभवोनास्तियथासुवर्णरजतादेस्त्रणकतांमृत्तिकतासु॥ तस्मात्सर्वसंभवाभावा
त्॥ सत्कार्यमिति॥ इतश्च॥ शक्तस्यशक्यकरणात्॥ इहशक्तः कुलालः करणोपकरणंचमृत्पिंडचक्रचीवरसू
त्रोदकानाप्रयत्नाच्छक्यमेवघटंमृत्पिंडादुत्पादयति॥ तस्मात्सत्कार्यं॥ रतश्च॥ कारणाभावाच्चसत्कार्यंकारणंयत्र
क्षणंतल्लक्षणमेवकार्यमपि॥ यथायनेभ्योयवाः॥ व्रीहिभ्योव्रीहयोनिष्पद्यंते॥ यद्यसत्कार्यंस्यात्ततः कोऽवेभ्यः
शालयस्यंनेचसंति॥ तस्मात्सत्कार्यं॥ एवंपंचभिर्हेतुभिः प्रध्यानेयदादितिंगमास्ति॥ तस्मात्सतउत्पत्तिर्ना स
तइति॥ प्रकृतिविरूपंसरूपंचेयदुक्तंतत्कथंमित्युच्यते॥ ९॥ हेतुमदनित्यमव्यापिसक्रियमनेकमाश्रितंलिंगंसाव

BHAU DAJI MEMORIAL

लाप्य

स्क

यवंमतंत्रंत्रंविपरीतमव्यक्तं॥ व्यक्तमहदादिकार्यहेतुमदितिहेतुरस्यास्तीतिहेतुमत्हेतुरूपंदेशः॥ कारणंनिमि
त्तमितिपर्यायाः व्यक्तस्यप्रधानंहेतुरस्तीहेतुअतोनुमव्यक्तं॥ भूतपर्यंतहेतु बुद्धितत्वंप्रधानेनहेतुमानहं
कारोबुध्यापंचतन्मात्राण्य॥ कार्योंद्रियाणिहेतुमत्यहंकारेण आकाशंशब्दतन्मात्रेणहनुमत॥ वायुःस्पर्शत
न्मात्रेणहेतुमत॥ तेजोरूपतन्मात्रेणहेतुमव॥ आपोरसतन्मात्रेणहेतुमत॥ पृथिवीगंधतन्मात्रेणहेतुमत॥ एवं
एवंलक्षणपर्यंतंव्यक्तंहेतुमत॥ किंचान्यतअनित्यंव्यक्तं॥ महदादियस्मादन्यस्मादुत्पद्यते॥ तस्मादनित्यंयथामृत्पिं
डादुत्पन्नोसचानित्यः॥ किंच॥ अव्यापिव्यक्तं॥ असर्वगमित्यर्थः॥ यथाप्रधानपुरुषौसर्वगतौवंव्यक्तं॥ किंचान्य
त॥ सक्रियंव्यक्तं॥ संसारकालेसंसरति॥ त्रयोदशविधेनकरणेनसंयक्तंसूक्ष्मशरीरमाश्रित्यसंसरतितस्मा
त्सक्रियं॥ किंचान्यतअनेकंव्यक्तं॥ बुद्धिरहंकारः॥ पंचतन्मात्राणिएकादशेंद्रियाणिपंचमहाभूतानि॥ एवमने
कं किंचाश्रितव्यक्तं यस्मादुत्पद्यतेतदाश्रितं यथाबुद्धिःप्रधानमाश्रिता अहंकारोपिबुद्धिमाश्रितः॥ पंच
तन्मात्राण्येकादशेंद्रियाणिअकाराश्रितानिपंचमहाभूतानिपंचतन्मात्राश्रितानि॥ किंचान्यत॥ लिंगव्यक्तं॥ प्र
लयकालेपंचमहाभूतानि॥ तन्मात्रेषुप्रलयंयांति॥ पंचतन्मात्राण्येकादशेंद्रियाणिचाहंकारेअहंकारोबुद्धौप्र
लयंयाति॥ बुद्धिःप्रधानेएवंलिंगंव्यक्तं॥ किंचान्यत॥ सावयवंअवयवाःशब्दरूपरसगंधास्पर्शास्तिसहेतिसा
वयवंकिंचान्यत॥ परतंत्रंव्यक्तं॥ नात्मनःप्रभवति॥ यथाप्रधानतंत्राकहिः॥ बुद्धितंत्रोहंकारोहंकारेपंचत
न्मात्राणिइंद्रियाणिच॥ तन्मात्रतंत्राणिपंचमेहाभूतानिएवंपरतंत्रंनिति॥ व्यक्तंव्याख्यात॥ अव्यक्तंव्याख्या
स्यामिविपरीतमव्यक्तं॥ एतैरेवगुणैर्यथोक्तैर्विपरीतमव्यक्तं॥ हेतुमत्व्यक्तंउक्तंहेतुमदव्यक्तं॥ नहिप्रधा

नासरंकिंचिदन्यदस्तियतःप्रध्यानस्योसत्ति॥ तस्माद्हेतुमद्व्यक्तं किंचनित्यंव्यक्तं॥ अनुसाद्यत्वात्॥ नहिभूत
वत्॥ कुतश्चिदुसद्यते॥ प्रधानं॥ किंचान्यत॥ ॥ अव्यापिव्यक्तमसर्वगतंव्यापिप्रधानंसर्वगत्वात्॥ सक्रियंव्य
क्तमक्रियंमीव्यक्तं॥ सर्वगतत्वादेव॥ तथाअनेकंव्यक्तंएकंप्रधानंकारणत्वात्॥ त्रयाणांलोकानांप्रधानमेकंकार
णंतस्मादेकंप्रधानं॥ किंचान्यत॥ आश्रीतंव्यक्तं॥ कार्यत्वात्॥ अनाश्रितमव्यक्तं॥ अकार्यत्वात्॥ नहिप्रधानाकिंचि
दस्ति॥ परंयत्साप्रधानकार्यंस्यात्॥ तथालिंगव्यक्तमलिंगमव्यक्तं॥ महदादिलिंगंप्रलयकालेपरस्परंप्रतीयते॥ नै
वंतस्मादलिंगंकिंचान्यत॥ सावयवंव्यक्तंशब्दस्पर्शरसरूपगंधाःपंचावयवाव्यक्तस्यतस्मात्सावयवंव्यक्तं निरव
यवंप्रधानं॥ नहिशब्दस्पर्शरसरूपगंधाः॥ संति॥ तस्मान्निरवयवंप्रधानं॥ किंचान्यत॥ परतंत्रंव्यक्तं॥ स्वतंत्रमव्य
क्तं॥ भवत्यात्मनः॥ एवंव्यक्ताव्यक्तयोर्वैधर्म्यमुक्तं॥ साधर्म्यमुच्यते॥ यदुक्तंसरूपंच॥ १०॥ त्रिगुणमविवेकिविषयः॥
सामान्यमचेतनंप्रसवधार्मव्यक्तंतथाप्रधानंतद्विपरीतस्तथाचपुन॥ त्रिगुणाव्यक्तं॥ सत्वरजसांसित्रयोगुणा
यस्येवि॥ अविवेकिव्यक्तं॥ दृष्टव्यक्तमिमेगुणारति॥ नविवेकः कर्त्तुंयाति॥ यथाद्रव्यंगोदध्यःयेगुणास्तद्व्यक्तं
यद्व्यक्तंतेगुणाइति॥ किंचान्यत॥ विषयोव्यक्तंभोग्यमित्यर्थः॥ तथासामान्यंव्यक्तं॥ सर्वपुषाणांविषयभूतत्वात्॥
प्रत्यदर्शनात्॥ सर्वसाधारणत्वात्॥ सर्वपुषाणांसाधारणमित्यर्थः॥ तथाचेतनंवाव्यक्तं॥ विवेकज्ञानरहितमित्य
र्थः॥ तथाप्रसवधर्मि॥ बुद्धेरहंकारः॥ प्रसूयते॥ अहंकारात्पंचतन्मात्राणिप्रसूयंतेतन्मात्रेभ्यःपंचमहाभू
तानि॥ एवमेतेव्यक्तधर्माः॥ प्रसवधर्मातउक्ताःएभिर्व्यक्तंसरूपंचतथाव्यक्तंतथाप्रधानमपितत्त्रिगुणंव्यक्तं
अव्यक्तमपित्रिगुणंयस्येतन्महदादिकार्यंत्रिगुणंहृदयात्मकंकार्यंतदात्मकंकारणमपि॥ तथाकृष्णंतुभ्यः

छछरावपटोभवतितथाअविवेकिव्यक्तंप्रधानमपिगुणैर्नभिसाध्यते॥ अन्येगुणाअन्यतप्रधानमेवंवेविवुनयाति॥
तस्मादविवेकिप्रधानमपिकिंचान्यत्॥ विषयो॥ व्यक्तंभोग्यंप्रधानमपि॥ सर्वपुरुषविषयभूतत्वात्॥ विषयइतिकिंच
सामान्यंव्यक्तंमूल्यदासीवत्॥ सर्वसाधारणत्वात्॥ एवंप्रधानमपिकिंचान्यत्॥ अचेतनंव्यक्तं॥ प्रधानमपिअचेतनं
सुखदुःखमोहान्नचेतयतीतिकायादनुमीयते॥ इहहिअचेतनात्॥ मृत्पिंडादचेतनएवघटउत्पद्यते॥ किंचान्यत्प्र
सवधर्मार्मव्यक्तंप्रधानमपिप्रसवधर्मियत॥ प्रधानात्बुद्धिःप्रसूयतेएवंप्रधानमितिव्याख्यातं॥ अधुनात्हि
परीतस्तथाचपुमानित्येतद्व्याख्यायते॥ तद्विपरीतस्ताभ्यांव्यक्तप्रधानाभ्यांविपरीतपुमान्त्रिगुणंव्यक्तम
व्यक्तंच॥ अगुणःपुरुषः॥ विवेकिव्यक्तंप्रधानंचविविक्तपुरुषोगुणैर्वियुक्तोविशुद्धत्वात्॥ विषयोव्यक्तंप्रधानंच
अविषयीपुरुषः॥ सुखदुःखमोहात्नेतयतिसंजानीतेतस्माच्चेतनः॥ पुरुषइति॥ प्रसवधर्मिव्यक्तंप्रधानंच॥अ
प्रसवधर्मापुरुषः॥ नहिकिंचितपुरुषात्प्रसूयते॥ तस्मादुक्तंविपरीतःपुमानिति॥ यदुक्तंचतथाचपुमान्॥ तत्पूर्व
स्यामार्यायांप्रधानंयथाव्याख्यातं॥ तथाच॥ पुमानपितद्यथा॥ हेतुमदनित्यमित्यादिव्यक्तं॥ विपरीतमव्यक्तं॥त
त्रहेतुमद्व्यक्तमहेतुमत्प्रधानं॥ तथापुमानहेतुमान्अनुत्पाद्यत्वादनित्यं॥ व्यक्तंनित्यंप्रधानंतथाचपुमान्नित्यः॥
अनुत्पाद्यत्वादेवाकिंचान्यत्र॥ अव्यापिव्यक्तं॥ व्यापिप्रधानंतथाचपुमान्व्यापीसर्वगइत्यर्थः॥ सक्रियंव्यक्तमक्रि
यंप्रधानं॥ तथाच॥ पुमानक्रियःसर्वगत्वात्॥ अनेकंव्यक्तमनेकंप्रधानं॥ तथाचपुमानेक॥ आश्रितंव्यक्तमा
नाश्रितंप्रधानं॥ तथाचपुमाननाश्रितः॥ लिंगंव्यक्तमलिंगंप्रधानं॥ तथाचपुमानप्यलिंगः॥ नक्वचित्त्रयंगच्छति॥ ॥ ६ ॥
सावयवंव्यक्तंनिरवयवप्रधानं॥ तथाचपुमानपिनिरवयवः॥ नहिपुंसेशब्दादयोवयवाःसंतिकिंचान्यत्॥ पर

तंत्रंव्यक्तंस्वतंत्रंप्रधानं॥ तथाचपुमानपिस्वतंत्रः॥ आत्मनःप्रभवतीत्यर्थः॥ एवंपुरुषाव्यक्तयोःसाधर्म्यव्याख्यातं॥
पूर्वस्यामार्यायांव्यक्तप्रधानयोःसाधर्म्यंपुरुषस्यवैधर्म्यंच॥ त्रिगुणमविवेकीच॥ त्यादि॥ कृतार्यायांव्याख्या
तंतत्रयदुक्तंत्रिगुणमितिव्यक्तंमव्यक्तंच॥ तत्केगुणारिति॥ तत्स्वरूपप्रतिपाद्द्नायइदमाह॥२१॥प्रीत्यप्रीतिवि
षादात्मकाः॥ प्रकाशप्रवृत्तिनियमार्थाः॥ अन्योन्याभिमिथुनवृत्तयगुणःप्रीत्यात्मकाः॥अ
प्रीत्यात्मकाविषादाश्चगुणाःसत्वरजस्तमासीत्यर्थः॥ तत्रप्रीत्यात्मकंसत्वप्रीतिःसुखंतदात्मकंमितिअप्री
त्यात्मकंरजः॥ अप्रीतिर्दुःखं॥विषादात्मकंतमः॥ विषादोमोहस्तदात्मकंतथाप्रकाशप्रवृत्तिर्नियमार्थः॥अर्थ
शब्दःसामर्थ्यवाची॥प्रकाशार्थंसत्वंसमर्थमित्यर्थः॥प्रवृत्यर्थंरजासुत्सर्थंतमः॥प्रकाशक्रियास्थितिशीला
गुणाइत्यर्थः॥किंचान्यत्॥अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्चगुणाः॥अन्योन्याभिभवश्चअ
न्योन्याश्रयाश्च॥अन्योन्यजननाश्चअन्योन्यमिथुनाश्च॥अन्योन्यवृत्तयश्च॥येतेतथोक्ताः॥अन्योन्याभि
भवाइत्यन्योन्यपरस्परमभिभवंति॥प्रीत्यप्रीत्यादिभिर्धर्मैरभिभवंति॥यथासत्वमुक्तंभवंति॥तदारज
स्तमसीअभिभूयस्वगुणेनप्रीतिप्रकाशात्मनेनावतिष्ठते॥एवरजः॥सत्वतमसीअभिभूयप्रवृत्यप्रीति
धर्मेणतथातमः॥सत्वरजसीअभिभूयविषायस्थितात्मनावतिष्ठते॥अन्योन्याश्रयाश्च॥त्रिरेवंतेगुणाः॥
अन्योन्यजननाश्च॥कदाचित्सत्वरजस्तमसीजनयतः॥रजसत्वतमसीतमश्चसत्वरजसी॥एवंद्वावेकं
जनयतः॥इत्यन्योन्यजननागुणाः॥एवंगुणाः॥तथामृत्पिंडोघटंजनयतितथाअन्योन्यमिथुनाश्च॥यथा
स्त्रीपुंसोःअन्योन्यमिथुनौ॥तथागुणाः॥परस्परमिथुनाः॥उक्तंच॥रजसोमिथुनंसत्वंसत्वस्यमिथुनं

रजः॥ उभयोस्त्वरजसोमिथुनंतमउच्यते॥ परस्यसदापारत्यर्थः॥ अन्योन्यवृत्तयश्चपरस्परंवृत्तिजनयंति॥ गुणा
गुणेषुवर्ततेइति वचनात्॥ यथासत्रूस्त्रीसत्रूशीलाचसर्वसात्रवहेतुः॥ सपत्नीनांसेवदुःखहेतुः॥ सेवचरा
गिणांमोहजनयतीत्येवंसत्वरजस्तमसोहेतुः॥ यथाचराजासदोद्यतःप्रजापननेवदुष्टतियंहणशिष्टानांसुखं
दुष्टानांदुमोहंच॥ एवंराजसमीर्यंरजः॥ तथालमः॥ स्वरूपेणावरणात्मकेनसत्वरजसोवृत्तिंजनयति॥ तथामेघा
र्यवमाद्यंजगतःसुखंजनयंति॥ वृत्याकृकारणंचकर्षणेयोगंजनयंति॥ विरहिमोहं॥ एवमन्योन्यवृत्तयोगु
णाः॥ किंचान्यत्॥ २२॥ सत्वंलघुप्रकाशकमिष्टमुपष्टंभकंचलंचरजः॥ गुरुवरणकमेवतमः॥ प्रदीपवच्चार्थतोवृत्तिः॥
सत्वंलघुप्रकाशकंच॥ यदासत्वमुत्कटंच॥ तदालघुन्यगानिबुद्धिप्रकाशश्चयति॥ प्रसंनतेंद्रियाणांचहृष्टंचईश्वरसु
पसाधनहेतुत्वात्॥ उपष्टंभकंचलंचरजः॥ उपष्टंभनातीहितिउपष्टंभउद्योगजनन॥ यथाक्षोवृषदशनेनउपष्टंभक
ति॥ एवंराजोवृत्तिः॥ चलंचरजः॥ रजोवृत्तिश्च॥ चलचित्तश्चभवतिगुरुवरणकमेवतमः॥ यदातमलकरंभवति
तदागुरुगानिचर्यंति॥ अस्तनींद्रियाणिस्वार्थानिभवंति॥ अत्राहः॥ यदिगुणाःपरस्परविरुद्धाः स्वमतेनेक
मर्थमुसादयंति॥ कथं॥ प्रदीपवच्चार्थतोवृत्तिः॥ प्रदीपेनउत्त्याःप्रदीपवत्॥ अर्थतः॥ अर्थसाधनाद्वृत्तिः॥ इहात
थागुणाः॥ प्रकाशप्रवृत्तिस्थित्यादिभिरर्थैःपुरुषस्यार्थंविचारणकुर्वंति॥ यथाअहोरात्रंदीपास्तेलाग्नि वर्त्या
दिभिःपरस्परविरुद्धोर्थंनिष्पादयति॥ तैलाग्निवर्तसंयोगात्॥ प्रकाशमात्मनजनयति एवसत्वरजस्तमांसिप
रस्परविरुद्धान्यर्थंनिषादयंति॥ अनंतरश्लोभवति॥ त्रिगुणमविवेक्यादिइतिकथमवगम्यते॥ तदाह॥ १७॥
अविवेक्यादिसिद्धस्त्रैगुण्यात्तद्विपर्ययाभावात्॥ कारणगुणसकलात्॥ कार्यस्याव्यक्तमपिसिद्धं॥ योर्थअवि

॥ ७ ॥

वेक्यादिगुणागणस्त्रैगुण्यान्महदादेव्यक्तंसिद्धः॥ अव्यक्तंसनसिध्यति॥ अत्रोच्यते॥ तद्विपर्ययाभावात्॥ सिद्धः॥
अव्यक्तं॥ यथायत्रैवतंतवस्तत्रैवपटअन्येतंतवोन्यःपटइतिनास्ति॥ कुतस्तद्विपर्ययाभावात्॥ एवंव्यक्तंव्यक्तसं
घोध्योभवतिदरेप्रधानमासन्धेव्यक्तं॥ योव्यक्तंपश्यति॥ सप्रधानमपिपश्यति॥ तद्विपर्ययाभावात्॥ इतश्चाव्य
क्तंसिद्धं॥ कारणगुणात्मकत्वात्॥ कार्यस्य॥ लोकेयदात्मकंकारणंतदात्मकंकार्यास्ति॥ यथाकृष्णेभ्यस्तंतुभ्य
कृष्णएवपटोभवति॥ एवंमहदादिलिंगं॥ अविवेकिविषयःसामान्यमचेतनंप्रसवधर्मियदात्मकंलिंगंतदात्मकमव्यक्तं
मपिसिद्धं॥ त्रैगुण्यद्विवेक्यादिव्यक्तंसिद्धं॥ तद्विपर्ययाभावादेवंकारणगुणात्मकत्वात्॥ कार्यस्याव्यक्तमपिसि
द्धमित्येतन्मिथ्य॥ लोकेयच्चोपलभ्यतेतन्नास्ति॥ यथाद्वितीयमनीश्वरशिरस्त्रीयोबाहुरिति॥ तथाप्रधानम
पोअनुपलभ्यमानत्वान्नास्तियतोहिमवतःपरेणपरसरास्ति॥ नचोपलभ्यते॥ तत्किंनास्त्येवंप्रधानमथास्ति॥
किंत्वनोपलभ्यतेतदाह॥ १८॥ भेदानांपरिमाणात्समन्वयात्शक्तितःप्रवृत्तेश्च॥ कारणकार्यविभागाद्विभागा
द्वैश्वरूपस्य॥ एकाबुद्धिरेकोहंकारः॥ पंचतन्मात्राण्येकादशेंद्रियाणिपंचमहाभूतानीत्येवंभेदानांपरिमाणा
दस्ति॥ प्रधानंकारणंयदव्यक्तंपरिमितमुसादयति॥ यदिप्रधानंतस्यात्तनोतिः॥ परिमाणमिदंव्यक्तमपिस्यात्॥
परिमाणाच्चभेदानामस्ति॥ प्रधानमपि॥ यस्माद्व्यक्तमुसर्जनंतथासमन्वयात्॥ इहलोकेसिद्धिर्दृष्टा॥ ब्रह्मचारि
णंवर्दुदृष्टासमन्वीयत॥ नूनमस्यास्तिब्राह्मण्यमिति॥ एवमिदंत्रिगुणंमहदादिलिंगंदृष्टासाधर्म्यादस्य
यत्कारणंतदपित्रिगुणंभविष्यति॥ अतःसमन्वयादस्तिप्रधानमिति॥ शक्तितःप्रवृत्तेश्च॥ इहयोयच्छक्त
सतस्मिन्नेवार्थेप्रवर्तते॥ यथाकुलालोघटकरणेसमर्थः॥ घटमेवकरोति॥ नपटंरथमिति॥ तथास्तिप्रधानंका

रणंयद्दृक्ंव्यक्तस्यकरणेप्रधानेशक्त्यानुपगमात॥ साचशक्तिर्नातिरेणप्रयत्नाद्दृयति तस्मादस्तिप्रधानंयत्र
शक्तिर्वर्तते॥ इतश्चास्तिप्रधानंकारणंकारण कार्यविभागात॥ करोतीतिकारणं॥ क्रियतेइतिकार्यं॥करणका
र्यस्यविभागोयथा घटोदधिमधुदृक्षयसाधारणसमर्थोनतथाप्रधानकारणंस्वविभागरदंव्यक्तमितिइति
श्च॥ मृत्पिंडमृत्पिंडोवा यथाघटंनिष्पादयति॥ नैवंघटोमृत्पिंडं॥ एवंमहादादिलिंगंदृष्टानुमीयते॥ अस्तिवि
भाक्तृत्कारणंयस्यविभागदृदंव्यक्तमिति॥ इतिश्च॥ अविभागाद्वैश्वरूप्यसाविश्वंजगत॥ तस्यरूपंव्यक्तं॥
विश्वरूपस्यभावोवैश्वरूपं॥ तस्यवैश्वरूप्यस्याविभादस्तिप्रधानं॥ यस्मात्त्रैलोक्यस्यपंचानांपृथिव्यादीनां
महाभूतानांपरस्परविभागोस्तिनमहाभूतेष्विवांतर्भूतात्रैलोक्या॥ इतिपृथिव्यास्तेजोवायुराकाशमिति
एतीतिपंचमहाभूतानिप्रलयकालेसृष्टिक्रमेणैवअविभागंयांति॥ तन्मात्रेषुतन्मात्राण्यकादशेंद्रियाणि
चाहंकारे॥ अहंकारोबुद्धौबुद्धिप्रधानेएवत्रयोलोकाःपलयकालेप्रकृतावविभागंगच्छंति॥ तस्मादविभागा
त्क्षीरदधिवत॥ व्यक्ताव्यक्तयोरस्तिस्यव्यक्तंकारणमिति॥ यद्येकंप्रधानकथंतर्हिकार्यमुत्पादयति॥ नहिएकं
कारणंलोकेकार्यमुत्पादयति॥ नह्येकःतंतुःपटाख्यंकार्यमुत्पादयति॥ एवंप्रधानमेकंकार्यंकथमुत्पादय
ति॥ अतश्च॥ १५॥ कारणास्तित्वंव्यक्तंप्रवर्ततेत्रिगुणतसमुदायाच्चपरिणामतःसलिलवत॥ प्रतिप्रतिगुणाश्र
यविभागात॥ अव्यक्तंव्याख्यातेकारणमास्ति॥ यस्मान्महदादिलिंगप्रवर्ततेत्रिगुणतत्रिगुणात॥ सत्वर
जस्तमांसित्रयोगुणायस्मिन्नत्रिगुणं किमुक्तंभवति॥ सत्वरजस्तमसासाम्यावस्थेप्रधानमितिश्च यथा
समुद्राया॥ यथागंगाश्चीतांसित्रिणिरुदूर्मयोनिपतितानि॥ एकंश्रोतोजनयंति॥ एवंत्रिगुणमेकंअव्यक्तं

॥ ८ ॥

व्यक्तंजनयंति॥ यथावातंतव॥ समुद्रिताः॥ पटंव्रनयंति॥ तथाप्रधानंगुणसमुद्रायात॥ महदादिव्रनयतीति॥
ननुयस्मात्त्रिगुणतः॥ समुदायाच्च॥ व्यक्तंजगतप्रवर्तते॥ प्रधानतस्मादेकरूपेणभवितव्यंनैवं परिणामतः
सलिलवत॥ प्रतिप्रतिगुणाश्रयविशेषात॥ एकस्मात॥ प्रधानात्त्रयोलोकाःसमुत्पन्नाःतुल्यभावानभवंतिदे
वाः॥ सत्वेनयुक्ताःमनुष्यादुःखेनतिर्यंचोमोहेनएकस्मात॥ प्रधानात॥ प्रवृत्तंव्यक्तंभवति॥ प्रतिगुणाश्रयविशेषात्परिणा
मतः॥ सलिलवद्भवतिप्रतिप्रतीतिवीप्सा॥ गुणानामाश्रयोगुणाःश्रयः॥ तस्यविशेषःतंगुणाश्रयविशेषंप्रतिनिधा
यप्रतिनिधायगुणाश्रयविशेषपरिणामात्प्रवर्ततेव्यक्तं॥ यथाआकाशादेकरसंसलिलंपतितंनानाश्रयसंश्लेषा
द्विद्यते॥ तद्वसांतरेरेवमेकस्मात्प्रधानात्प्रवृत्तास्त्रयोलोकानेकभावाभवंति॥ देवेषुसत्वमुत्कटं॥ रजस्तमसीउ
दासीने तेनतेअत्यंतसुखिनःमनुष्येषुरजउत्कटं॥ सत्वतमसीउदासीनतेनतेअत्यंतदुःखिनः॥ तिर्यक्षुतमउत्कटं॥
सत्वरजसीउदासीनतेनतेअत्यंतमूढः॥ एवमार्याद्वयेनप्रधानस्यास्तित्वमभ्युपगम्यते॥ इत्युत्तरंपुरुषास्तित्वप्रति
पादनार्थमहः॥ १५॥ संघातपरार्थत्वात्त्रिगुणादिविपर्ययादधिष्ठानात॥ पुरुषोस्तिभोक्तृभावात्कैवल्यार्थंप्रवृत्तेश्च॥
यदुक्तंव्यक्ताव्यक्तज्ञविज्ञानात॥ मोक्षःप्राप्यतइति॥ तत्रव्यक्तादनंतरमव्यक्तंपंचभिः॥ कारणैरधिगतमव्यक्तंच॥
ततपुरुषसूक्ष्मतरयानुमानास्तित्वंप्रक्रियतेअस्तिपुरुषःकस्मात॥ संघातपरार्थात्वात॥ योयंमहदादिःसंघा
तपरार्थइतिअनुमीयते॥ अचेतनत्वात॥ पर्यंकवत॥ यथापर्यंकःप्रत्येकंगोत्रासत्कपदिलाऊलीप्रच्छादनपरःप्रधानसा
धनःपरार्थः॥ नहिस्वार्थःपर्यंकस्यकश्चिदस्ति॥ नात्रगात्रकोसत्वधवयवानांपरस्परंसख्यंमस्ति॥ अतोन्योवगम्यते॥
अस्तिपुरुषोसोयःपर्यंकेशेते॥ यस्यार्थेपर्यंकतत्परार्थमिदंशरीरं पंचानांभूतानांयःसंघातोवर्तते॥ अस्तिपुरुषो

यस्येदंभोग्यंशरीरं भोग्यंमहदादिसंघातरूपं समुत्पन्नमिति ॥ इतश्चात्मास्तित्रिगुणा दिविपर्ययाद्यदुक्तंपूर्व
स्यामायायांत्रिगुणमविवेकिविषयइत्यादिविपर्ययाद्यनोक्तंविपरीतस्तथाचपुमान् ॥ अधिष्ठानात् ॥ यथेहलं
घनपूवनधावनसमर्थैरश्वैर्युक्तोरथःसारथिनाधिष्ठित॥ वर्तते॥तथात्माधिष्ठानात्॥शरीरमपितथाचोक्तं॥ष
ष्टितंत्रेपुरुषाधिष्ठितंप्रधानंवर्तते॥ अतोस्त्यात्माभोक्तृभावात्॥ तथामधुराम्ललवणकटुतिक्तकषायषट्
रसोपदेहितस्यसंसंस्कृतस्यान्नस्यचोक्तासाध्यते॥ एवंमहदादिलिंगस्यभोक्तातावदस्ति॥ यश्चभोक्तासआत्मा
यस्येदंभोग्यंशरीरोमेति ॥ इतश्चकेवल्यार्थंप्रवृत्तेश्च॥ केवलभावःकैवल्यंमोक्षस्याख्याकैवल्यनिमित्तंचया
प्रवृत्तिस्तस्यश्चकैवल्यार्थंप्रवृत्तेःसकाशादनुमीयते॥ अस्तिआत्मेति॥यतःसमर्थोपिविद्वान्विद्वांश्चसं
सारसंतानक्षयमिच्छति॥ एवमेभिर्हेतुभिरस्त्यात्माशरीरव्यतिरिक्तः॥अथसकिंनिक॥सर्वस्यकर्मानुसारेण
प्रत्येकंनिश्चयात्शरीरेष्वधिष्ठाता॥मणिरसनात्मकसूत्रवत्॥अहोस्वित्बहवः॥आत्मानःशरीराधिष्ठाता
रइत्यत्रोच्येते॥१७॥जन्ममरणकरणनांप्रतिनियमादयुगपत्॥प्रवृत्तेश्चपुरुषबहुत्वंसिद्धं॥त्रैगुण्यविपर्ययाच्चै
व॥जन्मचमरणंचकरणानिचजन्ममरणकरणानितेषांजन्ममरणानांप्रतिनियमात्॥प्रत्येकंनियमादित्य
र्थः॥यद्येकआत्मास्यात्ततःएकस्यजन्मनिसर्वेजायेरन्॥एकस्यमरणेसर्वेम्रियेरन्॥एकस्यकरणंवैक
ल्यंवाधियांधत्वमूकत्वकुणित्वरंजनत्वल्पक्षणेसर्वेवधिरांधमूककुणिखंजाःस्युः॥नचैवंभवति॥तस्मा
ज्जन्ममरणकरणानांपुरुषबहुत्वंसिद्धं॥इतश्च॥अयुगपत्प्रवृत्तेश्च॥युगपदेककालंनयुगपत्॥प्रवर्तनंप्रवृ
त्तिः॥तस्मादयुगपद्धादिषुप्रवृत्तिर्दृश्यते॥एकेधर्मेःप्रवृताःअन्येधर्मेविरागिज्ञानिनप्रवृताःत ॥ २ ॥

स्मादयुगपत्॥प्रवर्तश्च॥बहुत्वआत्मनइतिसिद्धं॥किंचान्यत्॥त्रैगुण्यविपर्ययाच्चैवत्रिगुणभावविपर्ययाच्चपुरुष
बहुत्वंसिद्धं॥तथासामान्येजन्मन्येकसात्विकःसुखीअन्यरजसोदुःखीअन्योस्तायसोमोहघान॥एवंत्रैगुण्यविप
र्ययापुरुषबहुत्वंसिध्यतीति॥अकर्तापुरुषउच्यते॥१८॥तस्माच्चविपर्यासात्॥सिद्धं॥साक्षित्वमसापुरुषस्य॥
कैवल्यंमाध्यस्थंदृष्टत्वापकर्तृभावश्च॥तस्माद्विपर्यासात्तस्माच्चयपोक्तेः॥त्रैगुण्यविपर्ययासात्॥विपर्यया
न्निर्गुणःपुरुषाविवेकीभोक्तेत्यादिगुणानांपुरुषस्यचेयोविपर्ययउक्तंस्तस्मात्सत्वरजस्तमस्युक्तभूतेषुसा
क्षित्वंसिद्धं॥पुरुषस्यास्यति॥योयमवहितोबहुत्वंप्रतिगुणरावकर्तारः॥प्रवर्ततेनिवर्ततेव॥साक्षीनप्रवर्ततेनाप
निवर्तते॥इतिच॥किंचान्यत्॥कैवल्यंकेवलभावःकेवलमन्यत्वमित्यर्थः॥त्रिगुणेभ्यःकेवलःअन्यस्मान्माध्यस्थं
मध्यस्थंभावः॥परिव्राजकवत्॥मध्यस्थपुरुषः॥यथाकश्चित्परिव्राजकोग्रामेणेषुकर्षणार्थंप्रवृत्तेषुकेवलोम
ध्यस्थःपुरुषोप्येवंगुणेषुवर्तमानेषुप्रवर्तते॥तस्मात्दृष्टत्वमकर्तृभावश्च॥यस्मान्मध्यस्थस्तस्मात्दृष्टावस्मा
त्दृष्टात्तस्मादकर्तापुरुषस्तेषांकर्मणामिति॥सत्वरजस्तमांसित्रयोगुणाः॥कर्मकर्तृभावेनप्रवर्तंते॥नपुरुषः
एवंपुरुषस्यास्तित्वमकर्तृकत्वंचासिद्धं॥ननुयद्यकर्तापुरुषः॥तत्कथमध्यवसायंकरोति॥धर्म्यंकरिष्याम्यधर्मं
नकरिष्यामि॥अतःकर्तृभवति॥नचकर्तापुरुषः॥एवमुभयथादोषःस्यादिति॥अतउच्यते॥१९॥तस्मात्तत्सं
योगादचेतनंचेतनावदिवलिंगं॥गुणाकर्तृत्वेचतथाकर्तेवभवत्युदासीनः॥इहपुरुषश्चेतनावात्तेनचेतनवता
संयुक्तंमहदादिलिंगंचेतनावदिवभवति॥तस्मात्गुणावसायंकुर्वंतीति॥नपुरुषयद्यपिलोकेपुरुषःकर्तागंतादृ
त्यादिच्युते॥तथातथापिकर्तापुरुषः॥तथागुणकर्तृत्वेचतथाकर्तेवभवत्युदासीनः॥गुणानांकर्तृत्वेसति

उदासीनोपिपुरुषःकर्ताइवनभवति॥परंपुनर्तात्रदृष्टांतोयथा॥अचोरश्चोरैःसहगृहीतः॥चोरवावगम्यते
एवंत्रयोगुणाःकर्तारस्तैःसंयुक्तःपुरुषःअकर्तापिकर्ताइवभवति॥कर्तृसंयोगादेवएवंव्यक्ताव्यक्तज्ञानंविभा
गोव्याख्यातोयद्विज्ञानान्मोक्षप्राप्तिरितिअथेतयोःप्रधानपुरुषयोःकिंहेतुःसंघातउच्यते॥२०॥पुरुषस्यदर्शना
र्थंकैवल्यार्थंतथाप्रधानस्य॥पंग्वंधवदुभयोरपिसंयोगस्ततःकृतःसर्गः॥पुरुषस्यप्रधानेनसदुसंयोगोद
र्शनार्थंप्रकृतिमहदादिकार्यं॥भूतपर्यंतंपुरुषःपश्यति॥एतदर्थंसंयुक्तःपुरुषःप्रधानेन॥प्रधानस्यापिके
वल्यार्थंपुरुषेणसंयोगःपुरुषस्यदर्शनेन॥प्रधानस्यकैवल्यंसंपद्यते॥एतदर्थंप्रधानस्यपुरुषेणसहसंयोगः
सचसंयोगः॥पंग्वंधवदुभयोरपिदृष्टाः॥यथैकःपंगुरकश्चाद्यः॥एतौद्वावपिगलंतौमहतीमार्थनाख्यांस
र्थस्यदैवकृतादुपपृतस्तात्॥स्वबंधुभिःपरित्यक्तौदैवादितश्चेतश्चस्वगत्यावसंतौसंयोगमुपागतौ॥पुनस्तयो
रूढावविश्वासेनसंयोगोगमनार्थः॥दर्शनार्थश्चसंजातःअंधेनपंगुःस्कंधमारोपितः॥तदज्ञानेनमार्गज्ञो
धोयाति पंगुश्चांधस्कंधमारूढः॥एवंपुरुषेदर्शनशक्तिरास्ति॥पुंगुवत्॥नगमनक्रिया॥प्रधानेगमनशक्ति
रास्ति॥पुंगुवत्॥नगमनक्रिया॥प्रधानेगमनशक्तिरास्ति॥अंधवत्तुदर्शनशक्तिः॥यथाचानयोःपंग्वंधयोः॥
कृतार्थयोर्विभागोभविष्यति॥ईप्सितंस्थानंप्राप्तयोःएवंप्रधानमपिपुरुषंसामोक्षंकृत्वानिवर्तते॥पुरुषोपिप्र
धानंदृष्ट्वाकैवल्यंगच्छतितयोः॥कृतार्थयोर्विभागोभविष्यतिःकिंचान्यत्॥ततःकृतःसर्गःतत्संयोगेनकृतस्तत्
कृतसर्गः॥सृष्टिर्यथा॥स्त्रीपुरुषसंयोगात्सुतोत्पत्तिः॥तथाप्रकृपुरुषसंसंयोगात्सर्गस्यसमुत्पत्तिः॥
इदानींसर्गविभागदर्शनार्थमाह॥२१॥प्रकृतेर्महांस्ततोहंकारस्तस्माद्गुणश्चषोडशकः॥तस्मादपिषोड

MEMORIAL

शकात्पंच्याभ्यःपंचभूतानिप्रकृतिः॥प्रधानं॥ब्रह्मअव्यक्तंयद्बुधात्मकं॥मायेतिपर्यायः॥अलिंगस्यप्रकृतेःसकाशात्स
हानुसद्यतेमहानबुद्धिः॥स्मरतिः॥ख्यातिज्ञानंप्रज्ञा॥पर्यायैरुच्यते॥तस्माच्चमहतोऽहंकारउत्पद्यते॥अंकारोभूता
निवैकृतस्तैजसोभिमानपर्यायाः॥तस्माच्चगणाषोडशकः॥तस्मादहंकारात्षोडशकः॥षोडश्चरूपोगणउत्पद्यते॥स
यथापंचतन्मात्राणिशब्दतन्मात्रंस्पर्शतन्मात्रंरसतन्मात्रंगंधतन्मात्रमिति॥पंचबुद्धींद्रियाणितन्मात्राणि॥अणुसू
क्ष्मपर्यायवाअनितथैकादशेंद्रियाणि॥श्रोत्रत्वक्चक्षुषीजिह्वाघ्राणमिति॥पंचबुद्धींद्रियाणि॥वाक्पाणिपादपायू
पस्थाःपंचकर्मेंद्रियाणि॥उभयात्मकमेकादशंमनः॥एकमेषःषोडशकोगणोहंकारादुत्पद्यते॥किंच॥पंचभ्यःपंच
महाभूतानितस्मादपिषोडशकहणात्पंचभ्यःतन्मात्रेभ्यःसकाशात्पंचतन्मात्राणिउत्पद्यंते॥शब्दतन्मात्रोदाका
शं॥स्पर्शतन्मात्राद्वायुः॥रूपतन्मात्रात्तेजः॥सतन्मात्रादापः॥गंधतन्मात्रात्पृथिवी॥एवंपंचभ्यःपरमाणुभ्यः
पंचमहाभूतानिउत्पद्यंते॥युद्बुद्ध्यव्यक्ताव्यक्तज्ञविज्ञानात्मोक्षः॥इतितत्रव्यक्तंमहदादिभूतपर्यंतंत्रयोविंशतिभे
द्व्याख्यातं॥अव्यक्तमपिभेदाभेदानांपरिमाणादित्वादिनाव्याख्यातंपुरुषोपिसंघातपरार्थात्वात्॥इत्यादिभि
र्हेतुभिर्व्याख्यातः॥एवमेतानिपंचविंशतितत्वानियेस्त्रैलोक्यंव्याप्तः॥तस्यतस्यभातत्वंतत्रोक्तं॥पंचविंशतित
त्वज्ञोयत्रेत्यादि॥तानियथाप्रकृतिपुरुषोबुद्धिरहंकारः॥पंचतन्मात्राणेकादशेंद्रियाणिपंचमहाभूतानित्येतानि
पंचविंशतितत्वानि॥तत्रोक्तं॥प्रकृतेर्महानुत्पद्यते॥तस्यमहतःकिंलक्षणमित्येतदाह॥२२॥अध्यवसायोबुद्धि
र्धर्मोज्ञानंविरागमैश्वर्यं॥सात्विकमेतद्रूपं॥तामसमस्माद्विपर्यस्तं॥अधास्तिकोंकुरः॥तद्धि॥अध्यवसायःअयंघटो
यंपटः॥इत्येवमध्यसति॥यासाबुद्धिरितिलक्षते॥साचबुद्धिरष्टांगा॥सात्विकतासरूपंचेदात्॥तत्रबुद्धिःसात्वि

कंरूपंचतुर्विधंभवति॥धर्मोज्ञानंवैराग्यमैश्वर्यमिति॥तत्रधर्मोनामदया॥दानयमनियमलक्षणः॥तत्रयमनिय
माश्चफलंजलाभिहिताः॥अहिंसासासूनृतास्तेयब्रह्मचर्यापरिग्रहाः॥यमाः॥शौचसंतोषतपः॥स्वाध्यायेश्वर
प्रणिधानानिनियमाः॥तत्रज्ञानंद्विविधं॥बाह्यमाभ्यांतरंच॥तथाबाह्यंनाम॥वेदाचत्वारश्चाङ्गानिकल्पव्याकरण
निरुक्तछंज्योतिषाख्यषडंगसंहिताः॥पुराणन्यायमीमांसाधर्मशास्त्राणीति॥अभ्यंतरंप्रकृतिपुरुषज्ञानंइयं
प्रकृतिः॥सत्वरजस्तमसांसाम्यावस्था॥अयंपुरुषश्शुध्धोनिर्गुणोव्यापीचेतनइत्यादि॥तत्रबाह्यज्ञाननिलोकर
क्षिलोकानुरागरत्यर्थः॥अभ्यंतरेणज्ञानेनमोक्षः॥वैराग्यमपिद्विविधं॥बाह्यमाभ्यंतरंच॥तथाबाह्यंदृष्टवि
षयेवैतृष्णामर्जनरक्षणदोषसंगहिंसादोषदर्शनाद्विरक्तस्य॥आभ्यंतरंप्रधानं॥अन्यतस्वेंद्रियजालसदृश
प्रिति॥विरक्तस्यमोक्षेसोयदुसद्यते॥तदाभ्यंतरेवैराग्यमिति॥एश्वर्यमीश्वरभावः॥तथाअष्टगुणं॥अणिमा
लघिमामहिमा॥गरिमा॥प्राप्तिः॥प्राकाम्यं॥ईशित्वं॥वशित्वं॥यत्रकामावसायत्वंचेति॥अणोर्भावअणिमासू
क्ष्मोभूत्वाविचरति॥महिमामहानभूत्वाविचरति॥लघिमाशाल्मलीतुलावयवादिष्वपिलघुतयापुष्पकेसराग्रेष्वपि
तिष्ठति॥गरिमागुरुत्वात्सर्वतादिरूपमाश्रित्यावतिष्ठते॥प्राप्तिः॥अमितंवस्तुयत्रतत्रावस्थितः॥प्राप्नोतिप्राकाम्यं
कामयतेयदेवेछति॥तदेवविदधातिइच्छाप्रकृतयात्रैलोक्यमपीष्टवशात्संवंवशीभवति॥यत्राकामावसायत्वं
ब्रह्मादिस्तंबपर्यंतेयत्रकामस्तत्रैववसतोस्वेछयास्थानासनविहारानाचरति॥इतिचत्वार्यैतानिबुधेः॥सात्विका
निनिरूपितानि॥यदा सत्वनरजस्तमसीअभिभूतेस्तः॥तदापुरुषएतान्बुधिगुणान्धर्मादीन्याति किंचान्यत्॥
तामसमस्माद्विपर्ययस्तं॥अस्माद्धर्मादेर्विपरीतंतामसंबुधिरूपंतत्रधर्माद्विपरीतअधर्मः॥एवमज्ञानम ॥ १२ ॥

वैराग्यमनैश्वर्यमिति॥एवंसात्विकैस्तामसैः स्वरूपैरष्टांगाबुधिः॥त्रिगुणादव्यक्तादुपपद्यते॥एवंबुधिलक्षण
मुक्तं महंकारलक्षणमुच्यते २३ अभिमानोहंकारस्तस्माद्विविधःप्रवर्ततेसर्गः॥एकादशकश्चगणास्त
न्मात्रःपंचकश्चैव॥अभिमानलक्षणोहमितिभावोरंकारः॥अहंशब्देस्पर्शेरूपेरसेगंधेभिमानात्॥अहंकर
णात्अस्मितालक्षणोहंकारः॥प्रवर्ततेसर्गः॥एकादशकश्चगणःएकादशेंद्रियाणितथातन्मात्रोगणपंच
कः॥पंचलक्षणोपेतः॥शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्ररसतन्मात्रगंधतन्मात्रलक्षणोपेतः॥किंलक्षण
कः॥सर्गरन्येतदाह २४ सात्विकएकादशकः॥प्रवर्ततेवैकृतादहंकारात्॥भूतादेस्तन्मात्रः॥संतामस्तेज
सादुभयं॥सत्वेनाभिभूतेयदारजस्तमसीअहंकारेभवतस्तदासोहंकारः॥सात्विकः॥तस्यपूर्वाचार्यःसंज्ञा
सता॥वैकृतइति॥तस्माद्वैकृतादहंकारादशइंद्रियगुणउत्पद्यते॥यस्मात्सात्विकानिविशुध्धानींद्रियाणि
स्वविषयसमर्थानीति॥तस्मादुच्यतेसात्विकएकादशइतिकिंचान्यत्॥भूतास्तन्मात्रः॥संतामसः॥साता
मसातेसत्वरजसीअहंकारेयदाभवतः॥तदासोहंकारस्तामसउच्यते॥पूर्वाचार्यैः संज्ञाकृताकृतादिरिति॥तस्मा
द्भूतोदेरहंकारात्तन्मात्रपंचकोगणउत्पद्यते॥भूतानामादिभूतस्तमोवदुलक्षणस्तेनोक्तंतामसइति किंच॥
तैजसादुभयंयदारसाभिभूतेसत्वतमसीअहंकारेभवतस्तदामोहंकारस्तैजसइतिसंज्ञातस्मात्तैजसादु
भयमुत्पद्यते॥उभयमित्येकादशकोगणः॥तन्मात्रश्चपंचकः॥योयंसात्विकोहंकारोवैकृताख्यःवैकृतोभू
त्वाएकादशेंद्रियाणिउत्पादयतिसतेजसमहंकारंगृह्णातिसात्विकोऽहंकारोवैकृताख्योनिःक्रियःसतैज
सयुक्तः॥इंद्रियोत्पत्तौसमर्थः॥तामसोऽहंकारोभूतादिसंज्ञिकः॥निःक्रियात्वात्तैजसेनाऽहंकारेणक्रिया

वतायुक्तः॥ तन्मात्राण्युसादयति॥तेनोक्तं॥तैजसादुभयमिति॥एवंतैजसेनाहंकारेणेंद्रियाणिएकादशपंच
तन्मात्राणिकृतानिभवंति॥सात्विकएकादशकइंद्रियगणःउक्तोयोवैकृतात्सात्विकादहंकारादुत्पद्यते तस्मा
कासंज्ञेत्याह॥२५॥ बुद्धींद्रियाणिचक्षुःश्रोत्रघ्राणरसनस्पर्शनानितानि॥वाक्पाणिपादपायूपस्थाः क
र्मेंद्रियाण्याहुः॥चक्षु दीनिस्पर्शनपर्यंतानिबुद्धींद्रियाणिपुच्यतेस्पृश्यतेअनेने स्पर्शन ---------ची
व्यक्तःसिद्धः॥स्पर्शनसंज्ञाऽस्तितेनेहपठ्यतेस्पर्शनकानीति॥शब्दस्पर्शरूपरसगंधानुपंचविषयानबुध्यंतेअवगच्य
तीतिबुद्धींद्रियाणिवाक्पाणिपादपायूपस्थानकर्मेंद्रियाण्याहुः॥कर्मकुर्वंतीतिकर्मेंद्रियाणितत्रवाग्वदति हस्तौ
नानाव्यापारतः॥पादौगमनागमनं॥पायुरुत्सर्गकरोति॥उपस्थःआनंदप्रजोत्पत्या॥एवंबुद्धींद्रियकर्मेंद्रियभे
देनदशेंद्रियाणिव्याख्यातानि॥मनएकादशंकिमात्मकंस्वरूपंचेति॥तदुच्यते॥२६॥ उभयात्मकमत्रमनःसंकल्प
कमिंद्रियंचसाधर्म्यात्॥गुणपरिणामविशेषान्नानात्वंबाह्यभेदाच्च॥अत्रेंद्रियवर्गेमनउभयात्मकंबुद्धींद्रियेषुबुद्धी
यत्रकर्मेंद्रियेषुकर्मेयत्र॥यथादेवदत्तोगोपालमध्येस्थितोगोपालत्वंमत्वमध्येस्थितामत्वंकरोति॥यस्मात्व
बुद्धींद्रियाणिवृत्तिंसंकल्पयंति॥कर्मेंद्रियाणिचतस्मादुभयात्मकंप्रनःसंकल्पयतीतिसंकल्पकं॥किंचान्यत्तुंद्रि
यंचसाधर्म्यात्॥समानधर्मभावात्॥सविकारादहंकारात्तबुद्धींद्रियाणिकर्मेंद्रियाणिचमनसासहोत्पद्यमानानि
मनसःसाधर्म्यंप्रतिपादयंति॥तस्मात्साधर्म्यात्मनोऽपिंद्रियामेवभेदानेकादशेंद्रियाणिसात्विकादहंकारादुत्पद्यमानानि॥तत्रमनसःकावृत्तिरिति॥संकल्पोवृत्तिः॥बुद्धींद्रियाणांशब्दादयोविषयाःकर्मेंद्रियाणां
वचनादयः॥अथैतानींद्रियाणिभिन्नानिभिन्नार्थग्राहकाणिकिमीश्वरेणस्वभावेनकृतानि॥यतः॥प्रधानकृत्य

र्म्य

हंकाराअचेतनाः॥पुरुषोप्यकर्तेत्याह॥इहसांख्यानांस्वभावोनामनकश्चित्कारणमास्ति॥तत्रोच्यते॥गुणपरिणाम
विशेषान्नानात्वंबाह्यभेदाच्च॥इमान्यवादशेंद्रियाणिशब्दस्पर्शरूपरसगंधाःपंचानांवचनादानविहरणिसर्गानं
दाश्चपंचानांसंकल्पश्चमनसएवमेतेभिन्नाःभिन्नानामर्थेद्रियाणामर्थाःगुणापरिणामविशेषात्॥गुणानांपरि
णामोगुणपरिणामः॥तस्यविशेषादिंद्रियाणांनानात्वं॥बाह्यार्थभेदाच्च॥अथैतन्नानात्वंनेश्वरेणनाकारणेनबुद्धा
